गर्भः, पुं, (गीर्य्यते जीवसञ्चितकर्म्मफलदात्रा ईश्वरेण प्रकृतिबलात् जठरगह्वरे स्थाप्यते पुरुषशुक्रयोगेणासौ । गॄ + “अर्त्तिगॄभ्यां भन् ।” उणां । ३ । १५२ । इति कर्म्मणि भन् ।) भ्रूणः । तद्विवरणं यथा,—
“स्वर्गाच्च नरकान्मुक्तः स्त्रीणां गर्भो भवत्यपि ।
नाभिभूतश्च तस्यैव याति बीजद्वयं हि तत् ॥
कललं बुद्बुदत्वञ्च ततः पेशीत्वमेव च ।
पेश्यामलसमोऽण्डः स्यादङ्कुरस्तत उच्यते ॥
अङ्गानामथ चोत्पत्तिः पञ्चानामनुलोमकात् ।
उपाङ्गान्यङ्गुलीनेत्रनासास्यश्रवणानि च ॥
प्ररोहं यान्ति चाङ्गेभ्यस्तद्वत्तेभ्यो नखादिकम् ।
त्वचो रोमाणि जायन्ते केशाश्चैव ततः परम् ॥
नरश्चाधोमुखः स्थित्वा दशमे च स जायते ।
ततस्तु वैष्णवी माया समाश्रयति मोहिनी ॥
बालत्वन्तु कुमारत्वं यौवनं वृद्धतामपि ।
ततश्च मरणं तद्वज्जन्ममाप्नोति मानवः ॥
एवं संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत् ।”
इति गारुडे २२६ अध्यायः ॥
तस्य लक्षणं यथा,—
“गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकम् ।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसंज्ञकम् ॥
कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः ।
भवेत्तदा स मुनिभिः शरीरीति निगद्यते ॥” * ॥
तदन्यप्रकृतिर्यथा,—
“यदा नार्य्यावुपेतायां वृषस्यन्त्यौ कथञ्चन ।
मुञ्चन्त्यौ शुक्रमन्योऽन्यमनस्थिस्तत्र जायते ॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः ।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः ॥”
इति भावप्रकाशः ॥ * ॥
अस्य द्वादशधा गतिर्यथा,—
“शुष्योऽनिलेन विगुणेन ततः स गर्भः
संख्यामतीत्य बहुधा समुपैति योनिम् ।
द्वारं निरुध्य शिरसा जठरेण कश्चित्
कश्चिच्छरीरपरिवर्त्तितकुब्जदेहः ॥
एकेन कश्चिदपरस्तु भुजद्वयेन
तिर्य्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः ।
“पार्श्वापवृत्तगतिरेति तथैव कश्चि-
दित्यष्टधा गतिरियं ह्यपरा चतुर्द्धा ॥
सङ्कीलकः प्रतिखुरः परिघोऽथ बीज-
स्तेषूर्द्ध्वबाहुचरणैः शिरसा च योनौ ।
सङ्गी च यो भवति कीलकवत् सकीलो
दृश्यैः खुरैः प्रतिखुरः स हि कायसङ्गी ॥
गच्छेद्भुजद्वयशिराः स च बीजकाख्यो
योनौ स्थितः सपरिघः परिघेण तुल्यः ॥” * ॥
गर्भनाशलक्षणादि ।
“अपविद्धशिरा या तु शीताङ्गी निरपत्रपा ।
नीलोद्धतशिरा हन्ति सा गर्भं स च तां तथा ॥
मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः ॥” * ॥
अन्तर्म्मृतगर्भलक्षणं यथा,—
“गर्भास्पन्दनमावीनां प्रणाशः श्याववर्णता ।
भवेदुच्छ्वासपूतित्वं शोथश्चान्तर्म्मृते शिशौ ॥”
इति माधवकरः ॥ * ॥
(“कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्याः सञ्जातो बाल उच्यते ॥
आधिक्ये रजसः कन्या पुत्त्रः शुक्राधिके भवेत् ।
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥”
इति पूर्ब्बखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम् ॥
“शुद्धे शुक्रार्त्तवे सत्वः स्वकर्म्मक्लेशचोदितः ।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ॥
बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः ।
मातुश्चाहाररसजैः क्रमात् कुक्षौ विवर्द्धते ॥
तेजो यथार्करश्मीनां स्फटिकेन तिरस्कृतम् ।
नेन्धनं दृश्यते गच्छत् सत्वो गर्भाशयं तथा ॥
कारणानुविधायित्वात् कार्य्याणां तत्स्वभावता ।
नानायोन्याकृतीः सत्वो धत्तेऽतो द्रुतलोहवत् ॥
अतएव च शुक्रस्य बाहुल्याज्जायते पुमान् ।
रक्तस्य स्त्री तयोः साम्ये क्लीवः शुक्रार्त्तवे पुनः ॥
वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता ।
वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ॥”
“पूर्णषोड़शवर्षा स्त्री पूर्णविंशेन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥
वीर्य्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥”
“शुद्धशुक्रार्त्तवं स्वच्छं सरक्तं मिथुनं मिथः ।
स्नेहैः पुंसवनैः स्निग्धं शुद्धशीलितवस्तिकम् ॥
नरं विशेषात् क्षीराज्यैर्मधुरौषधसंस्कृतैः ।
नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत् ॥”
“मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ।
ईषत् कृष्णं विगन्धञ्च वायुर्योनिमुखान्नुदेत् ॥
ततः पुष्पे क्षणादेव कल्याणध्यायिनी त्र्यहम् ।
मृजालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षैरेययावकं स्तोकं कोष्ठशोधनकर्षणम् ।
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ॥
इच्छन्ती भर्तृसदृशं पुत्त्रं पश्येत् पुरः पतिम् ।
ऋतुस्तु द्वादशनिशाः पूर्ब्बास्तिस्रश्च निन्दिताः ॥
एकादशी च युग्मासु स्यात् पुत्त्रोऽन्यासु कन्यका ।
उपाध्यायोऽथ पुत्त्रीयं कुर्व्वीत विधिवद्विधिम् ॥
नमस्कारपरायास्तु शूद्राया मन्त्रवर्ज्जितम् ।
अवन्ध्य एवं संयोगः स्यादपत्यञ्च कामतः ॥
सन्तोऽप्याहुरपत्यार्थं दम्पत्योः सङ्गतं रहः ।
दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि ॥
इच्छेतां यादृशं पुत्त्रं तद्रूपचरितांश्च तौ ।
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ॥
कर्म्मान्ते च पुमान् सर्पिः क्षीरशाल्योदनाशितः ।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत् ॥
अहिरसि आयुरसि सर्व्वतः प्रतिष्ठासि धाता
त्वाम् ।
दधातु विधाता त्वां दधातु ब्रह्मवर्च्चसा भवेति ॥
ब्रह्मा बृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां मुदा-
न्वितौ ।
उत्ताना तन्मना योषित् तिष्ठेदङ्गैः सुसंस्थितैः ॥
तथाहि बीजं गृह्णाति दोषैः स्वस्थानमास्थितैः ।
लिङ्गन्तु सद्यो गर्भाया योन्यां बीजस्य संग्रहः ॥
तृप्तिर्गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम् ।
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम् ॥
अव्यक्तः प्रथमे मासि सप्ताहात् कललो भवेत् ।
गर्भः पुंसवनान्यत्र पूर्ब्बं व्यक्तेः प्रयोजयेत् ॥
बली पुरुषकारो हि दैवमप्यतिवर्त्तते ।
पुष्ये पुरुषकं हैमं राजतं वाथ वायसम् ॥
कृत्वाग्निवर्णं निर्व्वाप्य क्षीरे तस्याञ्जलिं पिबेत् ।
गौरदण्डमपामार्गं जीवकर्षभसैर्य्यकान् ॥
पिबेत् पुष्ये जले पिष्टान् एकद्वित्रिसमस्तशः ।
क्षीरेण श्वेतबृहतीमूलं नासापुटे स्वयम् ॥
पुत्त्रार्थं दक्षिणे सिञ्चेत् वामे दुहितृवाञ्छया ।
पयसा लक्ष्मणामूलं पुत्त्रोत्पादस्थितिप्रदम् ॥
नासयास्येन वा पीतं वटशुङ्गाष्टकन्तथा ।
ओषधीर्जीवनीयाश्च बाह्यान्तरुपयोजयेत् ॥
उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भधृक् ।
नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ॥
अतिव्यवायमायासं भारं प्रावरणं गुरु ।
अकालजागरस्वप्नकठिनोत्कटकासनम् ॥
शोकक्रोधभयोद्वेगवेगश्रद्धाविधारणम् ।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम् ॥
रक्तं निवसनं श्वभ्रकूपेक्षां मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत् त्यजेत् ॥
तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात् ।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येत् म्रियेत वा ॥
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ।
पित्तलैः खलतिः पिङ्गः श्वित्री पाण्डुः कफा-
त्मभिः
व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत् ।
द्वितीये मासि कललाद्घनः पेश्यथवार्ब्बुदम् ॥
पुंस्त्रीक्लीवाः क्रमात्तेभ्यस्तत्र व्यक्तस्य लक्षणम् ।
व्यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम् ॥
मूर्द्धा द्वे सक्थिनी बाहू सर्व्वसूक्ष्माङ्गजन्म च ।
सममेव हि मूर्द्धाद्यैर्ज्ञानञ्च सुखदुःखयोः ॥
गर्भस्य नाभौ मातुश्च हृदि नाड़ी निबध्यते ।
यया स पुष्टिमाप्नोति केदार इव कुल्यया ॥
चतुर्थे व्यक्तताङ्गानाञ्चेतनायाश्च पञ्चमे ।
षष्ठे स्नायुशिरारोम-बल-वर्ण-नख-त्वचाम् ॥
सर्व्वैः सर्व्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे ।
गर्भेणोत्पीड़िता दोषास्तस्मिन् हृदयमाश्रिताः ॥
कण्डूं विदाहं कुर्व्वन्ति गर्भिण्याः किक्किसानि च ।
नवनीतं हितन्तत्र कोलाम्बुमधुरौषधैः ॥
सिद्धमल्पपटुस्नेहं लघुस्वादु च भोजनम् ॥
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम् ।
ओजोऽष्टमे सञ्चरति माता पुत्त्रौ मुहुः क्रमात् ।
तेन तौ म्लानमुदितौ तत्र जातो न जीवति ।
शिशुरोजोऽनवस्थानात् नारीसंशयिता भवेत्